

॥ श्रीगुरुभ्यो नमः ॥

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

## चतुर्थकाण्डे चतुर्थः प्रश्नः

### पञ्चमचितिशेषनिरूपणं

ॐ नमः परमात्मने । श्री गुरुभ्यो नमः । हरिः ॐ

रश्मिरसि ख्षयाय त्वा ख्षयञ्जिन्व प्रेतिरसि धर्माय त्वा धर्मञ्जिन्वान्वितिरसि दिवे त्वा दिवञ्जिन्व सन्धिरस्यन्तरिख्षाय त्वाऽन्तरिख्षञ्जिन्व प्रतिधिरसि पृथिव्यै त्वा पृथिवीञ्जिन्व विष्टम्भोऽसि वृष्ट्यै त्वा वृष्टिञ्जिन्व प्रवाऽस्यह्ने त्वाऽहर् जिन्वानुवाऽसि रात्रियै त्वा रात्रिञ्जिन्वोशिगसि ॥ [१] ॥ वसुभ्यस्त्वा वसूञ्जिन्व प्रकेतोऽसि रुद्रेभ्यस्त्वा रुद्राञ्जिन्व सुदीतिरस्यादित्येभ्यस्त्वाऽऽदित्या ञ्जिन्वौजोऽसि पितृभ्यस्त्वा पितृञ्जिन्व तन्तुरसि प्रजाभ्यस्त्वा प्रजा जिन्व पृतनाषाडसि पशुभ्यस्त्वा पशूञ्जिन्व रेवदस्योषधीभ्यस्त्वौषधीर् जिन्वाभिजिदसि युक्तग्रावेन्द्राय त्वेन्द्रं जिन्वाधिपतिरसि प्राणाय ॥ [२] ॥ त्वा प्राणञ्जिन्व यन्ताऽस्यपानाय त्वाऽपानञ्जिन्व सꣳसर्पोऽसि चख्षुषे त्वा चख्षुर् जिन्व वयोधा असि श्रोत्राय त्वा श्रोत्रञ्जिन्व त्रिवृदसि प्रवृदसि सँव्वृदसि विवृदसि सꣳरोहोऽसि नीरोहोऽसि प्ररोहोऽस्यनुरोहोऽसि वसुकोऽसि वेषश्रिरसि वस्यष्टिरसि ॥ [३] ॥

(उशिगसि प्राणाय त्रिचत्वारिꣳशच्च) ॥ १ ॥

राज्ञ्यसि प्राची दिग्वसवस्ते देवा अधिपतयोऽग्निर्हेतीनाम्प्रतिधर्ता त्रिवृत् त्वा स्तोमः पृथिव्याꣳ श्रयत्वाज्यमुक्थमव्यथयथ् स्तभ्नातु रथन्तरꣳ साम प्रतिष्ठित्यै विराडसि दख्षिणा दिग्

रुद्रास्ते देवा अधिपतय इन्द्रो हेतीनाम्प्रतिधर्ता पञ्चदशस्त्वा स्तोमः पृथिव्याꣳ श्रयतु प्रौगमुक्थमव्यथयथ् स्तभ्नातु बृहथ् साम प्रतिष्ठित्यै सम्राडसि प्रतीची दि ॥ [४] ॥ गादित्यास्ते देवा अधिपतयः सोमो हेतीनाम्प्रतिधर्ता सप्तदशस्त्वा स्तोमः पृथिव्याꣳ श्रयतु मरुत्वतीयमुक्थमव्यथयथ् स्तभ्नातु वैरूपꣳ साम प्रतिष्ठित्यै स्वराडस्युदीची दिग् विश्वे ते देवा अधिपतयो वरुणो हेतीनाम्प्रतिधर्तै कविꣳशस्त्वा स्तोमः पृथिव्याꣳ श्रयतु निष्केवल्य मुक्थमव्यथयथ् स्तभ्नातु वैराजꣳ साम प्रतिष्ठित्या अधिपत्न्यसि बृहती दिङ् मरुतस्ते देवा अधिपतयो ॥ [५] ॥ बृहस्पतिर्हेतीनाम्प्रतिधर्ता त्रिणवत्रयस्त्रिꣳशौ त्वा स्तोमौ पृथिव्याꣳ श्रयताँवैश्वदेवाग्निमारुते उक्थे अव्यथयन्ती स्तभ्नीताꣳ शाक्वररैवते सामनी प्रतिष्ठित्या अन्तरिक्षायर्षयस्त्वा प्रथमजा देवेषु दिवो मात्रया वरिणा प्रथन्तु विधर्ता चायमधिपतिश्च ते त्वा सर्वे सव्विदाना नाकस्य पृष्ठे सुवर्गे लोके यजमानञ्च सादयन्तु ॥ [६] ॥

(प्रतीची दिङ् मरुतस्ते देवा अधिपतय श्चत्वारिꣳशाच्च) ॥ २ ॥

---

अयम्पुरो हरिकेशः सूर्यरश्मिस्तस्य रथगृथ्सश्च रथौजाश्च सेनानिग्रामण्यौ पुञ्जिकस्थला च कृतस्थला चाप्सरसौ यातुधाना हेती रक्षाꣳसि प्रहेतिरयन्दक्षिणा विश्वकर्मा तस्य रथस्वनश्च रथेचित्रश्च सेनानिग्रामण्यौ मेनका च सहजन्या चाप्सरसौ दङ्क्ष्णवः पशवो हेतिः पौरुषेयो वधः प्रहेतिरयम्पश्चाद् विश्वव्यचा स्तस्य रथप्रोतश्चासमरथश्च सेनानिग्रामण्यौ प्रम्लोचन्ती चा ॥ [७] ॥ नुम्लोचन्ती चाप्सरसौ सर्पा हेतिर् व्याघ्राः प्रहेतिरयमुत्तराथ् सँय्यद्वसुस्तस्य सेनजिच्च सुषेणश्च सेनानिग्रामण्यौ विश्वाची च घृताची चाप्सरसावापो हेतिर् वातः प्रहेति रयमुपर्यर्वाग्वसुस्तस्य तार्क्ष्यश्चारिष्टनेमिश्च सेनानिग्रामण्यावुर्वशी च पूर्वचित्तिश्चा प्सरसौ विद्युद्धेतिरवस्फूर्जन् प्रहेति स्तेभ्यो नमस्ते नो मृडयन्तु ते यं ॥ [८] ॥ द्विष्मो यश्च नो द्वेष्टि तँवो जम्भे दधाम्यायोस्त्वा सदने सादयाम्यवत श्छायायान्नमः समुद्राय नमः समुद्रस्य चक्षसे परमेष्ठी त्वा सादयतु दिवः पृष्ठे व्यचस्वतीम्प्रथस्वतीँविभूमतीम्प्रभूमतीम्परिभूमतीन्दिवँय्यच्छ दिवन्दृꣳह दिवम्मा हिꣳसीर् विश्वस्मै प्राणायापानाय व्यानायोदानाय प्रतिष्ठायै चरित्राय सूर्यस्त्वाऽभि पातु मह्या स्वस्त्या छर्दिषा शन्तमेन तया देवतयाऽङ्गिरस्वद् ध्रुवा सीद॥ प्रोथदश्वो

न यवसे अविष्यन्यदा महः सवँरणाद् व्यस्थात्। आदस्य वातो अनु वाति शोचिरध स्म ते व्रजनङ्कृष्णमस्ति ॥ [९] ॥

(प्रम्रोचन्ती च यङ् स्वस्त्या ऽष्टाविꣳशतिश्च) ॥ ३ ॥

---

अग्निर् मूर्द्धा दिवः ककुत् पतिः पृथिव्या अयम्। अपाꣳ रेताꣳसि जिन्वति॥ त्वामग्ने पुष्करादद्ध्यथर्वा निरमन्थत। मूद्‌र्ध्नो विश्वस्य वाघतः॥ अयमग्निः सहस्रिणो वाजस्य शतिनस्पतिः। मूर्द्धा कवी रयीणाम्॥ भुवो यज्ञस्य रजसश्च नेता यत्रा नियुद्भिः सचसे शिवाभिः। दिवि मूर्द्धानन्दधिषे सुवर्षाञ्जिह्वामग्ने चकृषे हव्यवाहम्॥ अबोद्ध्यग्निः समिधा जनानां ॥ [१०] ॥ प्रति धेनुमिवायतीमुषासम्। यह्वा इव प्र वयामुज्जिहानाः प्र भानवः सिस्रते नाकमच्छ॥ अवोचाम कवये मेद्ध्याय वचो वन्दारु वृषभाय वृष्णे। गविष्ठिरो नमसा स्तोममग्नौ दिवीव रुक्ममुर्व्यञ्चमश्रेत्॥ जनस्य गोपा अजनिष्ट जागृविरग्निः सुदक्षः सुविताय नव्यसे। घृतप्रतीको बृहता दिविस्पृशा द्युमद् वि भाति भरतेभ्यः शुचिः॥ त्वामग्ने अङ्गिरसो ॥ [११] ॥ गुहा हितमन्वविन्दञ्छिश्रियाणव्वँनेवने। स जायसे मथ्यमानः सहो महत् त्वामाहुः सहसस्पुत्रमङ्गिरः॥ यज्ञस्य केतुम्प्रथमम्पुरोहितमग्निन्नरस्त्रिषधस्थे समिन्धते। इन्द्रेण देवैः सरथꣳ स बर्हिषि सीदन्नि होता यजथाय सुक्रतुः॥ त्वाञ्चित्रश्रवस्तम हवन्ते विक्षु जन्तवः। शोचिष्केशम्पुरुप्रियाग्ने हव्याय वोढवे॥ सखायः सव्वँः सम्यञ्चमिषꣳ ॥ [१२] ॥ स्तोमञ्चाग्नये। वर्षिष्ठाय क्षितीनामूर्जो नप्त्रे सहस्वते॥ सꣳसमिद् युवसे वृषन्नग्ने विश्वान्यर्य आ। इडस्पदे समिद्ध्यसे स नो वसून्या भर॥ एना वो अग्निन्नमसोर्जो नपातमा हुवे। प्रियञ्चेतिष्ठमरतिꣳ स्वद्ध्वरव्विँश्वस्य दूतममृतम्॥ स योजते अरुषो विश्वभोजसा स दुद्रवत् स्वाहुतः। सुब्रह्मा यज्ञः सुशमी ॥ [१३] ॥ वसूनान्देवꣳ राधो जनानाम्॥ उदस्य शोचिरस्थादाजुह्वानस्य मीढुषः। उद्धूमासो अरुषासो दिविस्पृशः समग्निमिन्धते नरः॥ अग्ने वाजस्य गोमत ईशानः सहसो यहो। अस्मे धेहि जातवेदो महि श्रवः॥ स इधानो वसुष्कविरग्निरीडेन्यो गिरा। रेवदस्मभ्यम्पुर्वणीक दीदिहि॥ क्षपो राजन्नुत त्मनाऽग्ने वस्तोरुतोषसः। स तिग्मजंभ ॥ [१४] ॥ रक्षसो दह प्रति॥ आ ते अग्न इधीमहि द्युमन्तन्देवाजरम्। यद्ध स्या ते पनीयसी समिद्दीदयति द्यवीषꣳ स्तोतृभ्य आ भर॥

आ ते अग्न ऋचा हविः शुक्रस्य ज्योतिषस्पते। सुश्चन्द्र दस्म विश्पते हव्यवाट् तुभ्यꣳ हूयत इषꣳ स्तोतृभ्य आ भर॥ उभे सुश्चन्द्र सर्पिषो दर्वी श्रीणीष आसनि। उतो न उत् पुपूर्या ॥ [१५] ॥ उक्थेषु शवसस्पत इषꣳ स्तोतृभ्य आ भर॥ अग्ने तमद्याश्वन्न स्तोमैः क्रतुन्न भद्रꣳ हृदिस्पृशम्। ऋद्ध्यामा त ओहैः॥ अधा ह्यग्ने क्रतोर् भद्रस्य दक्षस्य साधोः। रथीर्ऋतस्य बृहतो बभूथ॥ आभिष्टे अद्य गीर्भिर् गृणन्तोऽग्ने दाशेम। प्र ते दिवो न स्तनयन्ति शुष्माः॥ एभिर् नो अर्कैर् भवा नो अर्वाङ् ॥ [१६] ॥ स्वसुवर्न ज्योतिः। अग्ने विश्वेभिः सुमना अनीकैः॥ अग्निꣳ होतारम्मन्ये दास्वन्तँव्वसोः सूनुꣳ सहसो जातवेदसम्। विप्रन्न जातवेदसम्। य ऊर्द्ध्वया स्वद्ध्वरो देवो देवाच्या कृपा। घृतस्य विभ्राष्टिमनु शुक्रशोचिष आजुह्वानस्य सर्पिषः॥ अग्ने त्वन्नो अन्तमः। उत त्राता शिवो भव वरूथ्यः॥ तन्त्वा शोचिष्ठ दीदिवः। सुम्नाय नूनमीमहे सखिभ्यः॥ वसुरग्निर् वसुश्रवाः। अच्छा नक्षि द्युमत्तमो रयिन्दाः ॥ [१७] ॥

(जनाना मङ्गिरस इषꣳ सुशमी तिग्मजंभ पुपूर्या अर्वाङ् वसुश्रवाः पञ्च च) ॥ ४ ॥

इन्द्राग्निभ्यान्त्वा सयुजा युजा युनज्म्याघाराभ्यान्तेजसा वर्चसोक्थेभिः स्तोमेभि श्छन्दोभी रय्यै पोषाय सजातानाम्मद्ध्यमस्थेयाय मया त्वा सयुजा युजा युनज्म्यंबा दुला नितत्निरभ्रयन्ती मेघयन्ती वर्षयन्ती चुपुणीका नामासि प्रजापतिना त्वा विश्वाभिर् धीभिरुप दधामि पृथिव्युदपुरमन्नेन विष्टा मनुष्यास्ते गोप्तारोऽग्निर् वियत्तोऽस्यान्तामहम्प्र पद्ये सा ॥ [१८] ॥ मे शर्म च वर्म चास्त्वधिद्यौरन्तरिक्षम्ब्रह्मणा विष्टा मरुतस्ते गोप्तारो वायुर् वियत्तोऽस्यान्तामहम्प्र पद्ये सा मे शर्म च वर्म चास्तु द्यौरपराजिताऽमृतेन विष्टाऽऽदित्यास्ते गोप्तारः सूर्यो वियत्तोऽस्यान्तामहम्प्र पद्ये सा मे शर्म च वर्म चास्तु ॥ [१९] ॥

(सा ऽष्टाचत्वारिꣳशच्च) ॥ ५ ॥

बृहस्पतिस्त्वा सादयतु पृथिव्याः पृष्ठे ज्योतिष्मतीँव्विश्वस्मै प्राणायापानाय विश्वञ्ज्योतिर् यच्छाग्निस्तेऽधिपतिर् विश्वकर्मा त्वा सादयत्वन्तरिक्षस्य पृष्ठे ज्योतिष्मतीँव्विश्वस्मै प्राणाया-

पानाय विश्वज्योतिर् यच्छछ वायुस्तेऽधिपतिः प्रजापतिस्त्वा सादयतु दिवः पृष्ठे ज्योतिष्मती-
व्विँश्वस्मै प्राणायापानाय विश्वज्योतिर् यच्छछ परमेष्ठी तेऽधिपतिः पुरोवातसनिरस्यभ्रसनिरसि
विद्युथ् सनि ॥ [२०] ॥ रसि स्तनयित्नुसनिरसि वृष्टिसनिरस्यग्नेर्यान्यसि देवानामग्नेयान्यसि
वायोर् यान्यसि देवानाँव्वायोयान्यस्यन्तरिख्षस्य यान्यसि देवानामन्तरिख्षयान्यस्यन्तरिख्ष-
मस्यन्तरिख्षाय त्वा सलिलाय त्वा सर्णीकाय त्वा सतीकाय त्वा केताय त्वा प्रचेतसे त्वा
विवस्वते त्वा दिवस्त्वा ज्योतिष आदित्येभ्यस्त्वर्चे त्वा रुचे त्वा द्युते त्वा भासे त्वा ज्योतिषे त्वा
यशोदान्त्वा यशसि तेजोदान्त्वा तेजसि पयोदान्त्वा पयसि वर्चोदान्त्वा वर्चसि द्रविणोदान्त्वा
द्रविणे सादयामि तेनर्षिणा तेन ब्रह्मणा तया देवतयाऽङ्गिरस्वद् ध्रुवा सीद ॥ [२१] ॥

(विद्युथ्सनिर् द्युते त्वै कान्नत्रिꣳशच्च) ॥ ६ ॥

भूयस्कृदसि वरिवस्कृदसि प्राच्यस्यूर्ध्वाऽस्यन्तरिख्षसदस्यन्तरिख्षे सीदाप्सुषदसि
श्येनसदसि गृध्रसदसि सुपर्णसदसि नाकसदसि पृथिव्यास्त्वा द्रविणे सादयाम्य न्तरिख्षस्य
त्वा द्रविणे सादयामि दिवस्त्वा द्रविणे सादयामि दिशान्त्वा द्रविणे सादयामि द्रविणोदां त्वा
द्रविणे सादयामि प्राणम्मे पाह्यपानम्मे पाहि व्यानम्मे ॥ [२२] ॥ पाह्यायुर् मे पाहि विश्वायुर्
मे पाहि सर्वायुर् मे पाह्यग्ने यत् ते परꣳ हन्नाम तावेहि सꣳ रभावहै पाञ्चजन्येष्वप्येद्ध्यग्ने यावा
अयावा एवा ऊमाः सब्दः सगरः सुमेकः ॥ [२३] ॥

(व्यानम्मे द्वात्रिꣳशच्च) ॥ ७ ॥

अग्निना विश्वाषाट् सूर्येण स्वराट् क्रत्वा शचीपतिर्ऋषभेण त्वष्टा यज्ञेन मघवान् दख्षिणया
सुवर्गो मन्युना वृत्रहा सौहार्द्येन तनूधा अन्नेन गयः पृथिव्याऽसनो दृग्भिरन्नादो वषट्कारेणर्द्धः
साम्ना तनूपा विराजा ज्योतिष्मान् ब्रह्मणा सोमपा गोभिर् यज्ञन्दाधार ख्षत्रेण मनुष्यानश्वेन च
रथेन च वज्र्यृतुभिः प्रभुः संवँथ्सरेण परिभू स्तपसाऽनाधृष्टः सूर्यः सन् तनूभिः ॥ [२४] ॥

(अग्नि रैकान्नपञ्चाशत्) ॥ ८ ॥

प्रजापतिर् मनसाऽन्धोऽच्छेतो धाता दीख्षायाꣳ सविता भृत्याम्पूषा सोमक्रयण्याँव्वरुण उपनद्धोऽसुरः क्रीयमाणो मित्रः क्रीतः शिपिविष्ट आसादितो नरन्धिषः प्रोह्यमाणोऽधिपतिरागतः प्रजापतिः प्रणीयमानोऽग्निराग्नीध्रे बृहस्पतिराग्नीध्रात् प्रणीयमान इन्द्रो हविर्द्धानेऽदितिरासादितो विष्णुरुपावह्रियमाणोऽथर्वोपोत्तो यमोऽभिषुतोऽपूतपा आधूयमानो वायुः पूयमानो मित्रः ख्षीरश्रीर् मन्थी सक्तुश्रीर् वैश्वदेवोन्नीतो रुद्र आहुतो वायुरावृत्तो नृचख्षाः प्रतिख्यातो भख्ष आगतः पितृणान्नाराशꣳसोऽसुरात्तः सिन्धुरवभृथमवप्रयन्थ् समुद्रोऽवगतः सलिलः प्रप्लुतः सुवरुदृचङ्गतः ॥ [२५] ॥

(रुद्र एकविꣳशतिश्च) ॥ ९ ॥

कृत्तिका नख्षत्रमग्निर् देवताऽग्ने रुचः स्थ प्रजापतेर् धातुः सोमस्यर्चे त्वा रुचे त्वा द्युते त्वा भासे त्वा ज्योतिषे त्वा रोहिणी नख्षत्रम्प्रजापतिर् देवता मृगशीर्षन्नख्षत्रꣳ सोमो देवताऽऽर्द्रा नख्षत्रꣳ रुद्रो देवता पुनर्वसू नख्षत्रमदितिर् देवता तिष्यो नख्षत्रम्बृहस्पतिर् देवताऽऽश्रेषा नख्षत्रꣳ सर्पा देवता मघा नख्षत्रम्पितरो देवता फल्गुनी नख्षत्र ॥ [२६] ॥ मर्यमा देवता फल्गुनी नख्षत्रम्भगो देवता हस्तो नख्षत्रꣳ सविता देवता चित्रा नख्षत्रमिन्द्रो देवता स्वाती नख्षत्रँव्वायुर् देवता विशाखे नख्षत्रमिन्द्राग्नी देवताऽनूराधा नख्षत्रम्मित्रो देवता रोहिणी नख्षत्रमिन्द्रो देवता विचृतौ नख्षत्रम्पितरो देवताऽषाढा नख्षत्रमापो देवताऽषाढा नख्षत्रँव्विश्वे देवा देवता श्रोणा नख्षत्रँव्विष्णुर् देवता श्रविष्ठा नख्षत्रँव्वसवो ॥ [२७] ॥ देवता शतभिषङ् नख्षत्रमिन्द्रो देवता प्रोष्ठपदा नख्षत्रमज एकपाद् देवता प्रोष्ठपदा नख्षत्रमहिर् बुद्ध्नियो देवता रेवती नख्षत्रम्पूषा देवताऽश्वयुजौ नख्षत्रमश्विनौ देवताऽपभरणीर् नख्षत्रँय्यमो देवता, पूर्णा पश्चाद्>१, यत् ते देवा अदधुः >२ ॥ [२८] ॥

(फल्गुनी नख्षत्रं वसव स्त्रयस्त्रिꣳशच्च) ॥ १० ॥

मधुश्च माधवश्च वासन्तिकावृतू शुक्रश्च शुचिश्च ग्रैष्मावृतू नभश्च नभस्यश्च वार्षिकावृतू इषश्चोर्जश्च शारदावृतू सहश्च सहस्यश्च हैमन्तिकावृतू तपश्च तपस्यश्च शैशिरावृतू अग्नेरन्तः-श्लेषोऽसि कल्पेतान्द्यावापृथिवी कल्पन्तामाप ओषधीः कल्पन्तामग्नयः पृथङ्ग मम ज्यैष्ठ्याय सव्रता ॥ [२९] ॥ येऽग्नयः समनसोऽन्तरा द्यावापृथिवी शैशिरावृतू अभि कल्पमाना इन्द्र-मिव देवा अभि संविशन्तु संयच्च प्रचेताश्चाग्नेः सोमस्य सूर्यस्योग्रा च भीमा च पितृणाँय्यम-स्येन्द्रस्य ध्रुवा च पृथिवी च देवस्य सवितुर् मरुताँव्वरुणस्य धर्त्री च धरित्री च मित्रावरुणयोर् मित्रस्य धातुः प्राची च प्रतीची च वसूनाꣳ रुद्राणा ॥ [३०] ॥ मादित्यानान्ते तेऽधिपतय-स्तेभ्यो नमस्ते नो मृडयन्तु ते यन्द्विष्मो यश्च नो द्वेष्टि तँव्वो जम्भे दधामि सहस्रस्य प्रमा असि सहस्रस्य प्रतिमा असि सहस्रस्य विमा असि सहस्रस्योन्मा असि साहस्रोऽसि सहस्राय त्वेमा मे अग्न इष्टका धेनवः सन्त्वेका च शतञ्च सहस्रञ्चायुतञ्च ॥ [३१] ॥ नियुतञ्च प्रयुतञ्चार्बुदञ्च न्यर्बुदञ्च समुद्रश्च मध्यञ्चान्तश्च परार्द्धश्चेमा मे अग्न इष्टका धेनवः सन्तु षष्टिः सहस्रमयुतम-क्षीयमाणा ऋतस्थाः स्थर्तावृधो घृतश्चुतो मधुश्चुत ऊर्जस्वतीः स्वधाविनीस्ता मे अग्न इष्टका धेनवः सन्तु विराजो नाम कामदुघा अमुत्रामुष्मिँल्लोके ॥ [३२] ॥

(सव्रता रुद्राणा मयुतञ्च पञ्चचत्वारिꣳशच्च) ॥ ११ ॥

---

समिद्दिशामाशया नः सुवर्विन्मधोरतो माधवः पात्वस्मान्। अग्निर् देवो दुष्टरीतुरदाभ्य इद-ङ्क्षत्रꣳ रक्षतु पात्वस्मान्॥ रथन्तरꣳ सामभिः पात्वस्मान् गायत्री छन्दसाव्विश्वरूपा। त्रिवृन्नो विष्ठया स्तोमो अह्नाꣳ समुद्रो वात इदमोजः पिपर्तु॥ उग्रा दिशामभिभूतिर् वयोधाः शुचिः शुक्रे अहन्योजसीना। इन्द्राधिपतिः पिपृतादतो नो महि ॥ [३३] ॥ क्षत्रव्विश्वतो धारयेदम्॥ बृहथ् साम क्षत्रभृद्वृद्धवृष्णियन्त्रिष्टुभौजः शुभितमुग्रवीरम्। इन्द्र स्तोमेन पञ्च-दशेन मद्ध्यमिदँव्वातेन सगरेण रक्ष॥ प्राची दिशाꣳ सहयशा यशस्वती विश्वे देवाः प्रावृ-षाऽह्नाꣳ सुवर्वती। इदङ्क्षत्रन्दुष्टरमस्त्वोजोऽनाधृष्टꣳ सहस्रियꣳ सहस्वत्॥ वैरूपे सामन्निह तच्छकेम जगत्यैनव्विक्ष्वा वेशयामः। विश्वे देवाः सप्तदशेन ॥ [३४] ॥ वर्च इदङ्क्षत्रꣳ सलिलवातमुग्रम्॥ धर्त्री दिशाङ्क्षत्रमिदन्दाधारोपस्थाऽऽशानाम्मित्रवदस्त्वोजः। मित्राव-

रुणा शरदाऽह्नाँश्चिकित्नू अस्मै राष्ट्राय महि शर्म यच्छतम्॥ वैराजे सामन्नधि मे मनीषाऽनु-
ष्टुभा संभृतव्वँीर्यꣳ सहः। इदङ्क्षत्रम्मित्रवदार्द्रदानु मित्रावरुणा रक्षतमाधिपत्यैः॥ सम्राड्
दिशाꣳ सहसाम्नी सहस्वत्यृतुर्हेमन्तो विष्ठया नः पिपर्तु। अवस्युवाता ॥ [३५] ॥ बृहतीर् नु
शक्वरीरिमय्यँज्ञमवन्तु नो घृताचीः॥ सुवर्वती सुदुघा नः पयस्वती दिशान्देव्यवतु नो घृताची।
त्वङ्गोपाः पुरएतोत पश्चाद् बृहस्पते याम्याँय्युँङ्ग्धि वाचम्॥ ऊर्द्ध्वा दिशाꣳ रन्तिराशौषधीनाꣳ
सव्वँथ्सरेण सविता नो अह्नाम्। रेवथ् सामातिच्छन्दा उ छन्दोऽजातशत्रुः स्योना नो अस्तु॥
स्तोमत्रयस्त्रिꣳशे भुवनस्य पत्नि विवस्वद्वाते अभि नो ॥ [३६] ॥ गृणाहि। घृतवती सवित-
राधिपत्यैः पयस्वती रन्तिराशा नो अस्तु॥ ध्रुवा दिशाव्विँष्णुपत्न्यघोराऽस्येशाना सहसो या
मनोता। बृहस्पतिर् मातरिश्वोत वायुः सन्धुवाना वाता अभि नो गृणन्तु॥ विष्टम्भो दिवो धरुणः
पृथिव्या अस्येशाना जगतो विष्णुपत्नी। विश्वव्यचा इषयन्ती सुभूतिः शिवा नो अस्त्वदितिरु-
पस्थे॥ वैश्वानरो न ऊत्या>३, पृष्टो दिव्य>४, नु नो ऽद्यानुमति>५, रन्विदनुमते त्वं >६, कया
नश्चित्र आभुवत्>७, को अद्य युङ्क्ते >८ ॥ [३७] ॥

(महि सप्तदशेना वस्युवाताऽभि नोऽनु नश्चतुर्दश च) ॥ १२ ॥

## समाप्ति कोर्वैः

(रश्मिरसि राड्यस्य यम्पुरो हरिकेशो ऽग्निर् मूर्द्धे न्द्राग्निभ्यां बृहस्पतिर् भूयस्कृद स्यग्निना विश्वाषाट् प्रजापतिर् मनसा कृत्तिका मधुश्च समिद्दिशां द्वादश)

(रश्मिरसि प्रति धेनु मसि स्तनयित्नुसनिर स्यादित्यानाꣳ सप्तत्रिꣳशत्)

(रश्मिरसि को अद्य युङ्क्ते)

॥ हरिः ॐ ॥

**चतुर्थकाण्डे चतुर्थः प्रश्नः समाप्तः**

| अनुवाकाः | पञ्चाशत्यः |
|---|---|
| १२ | ३७ |

ॐ